# Purushottamasahasradhikanamavalih

# પુરુષોત્તમસહસ્રાધિકનામાવલિઃ

## Document Information

Text title : puruShottamasahasrAdhikanAmAvaliH

File name : puruShottamasahasrAdhikanAmAvaliH.itx

Category : vishhnu, sahasranAmAvalI, nAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : Vishnu Stuthi Manjari 3 . Names appearing in stotries in Bhagavatam arranged in sequence by Skandha.

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 4, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2021

*sanskritdocuments.org*

# પુરુષોત્તમસહસ્રાધિકનામાવલિઃ

(ભાગવતકથાઽનુસારિણી)

પ્રથમસ્કન્ધતઃ ।

ૐ શ્રીકૃષ્ણાય નમઃ । સચ્ચિદાનન્દાય । નિત્યલીલાવિનોદકૃતે ।
સર્વાગમવિનોદિને । લક્ષ્મીશાય । પુરુષોત્તમાય । આદિકાલાય ।
સર્વકાલાય । કાલાત્મને । માયયાઽઽવૃતાય । ભક્તોદ્ધારપ્રયત્નાત્મને ।
જગત્કર્ત્રે । જગન્મયાય । નામલીલાપરાય । વિષ્ણવે । વ્યાસાત્મને ।
શુકમોક્ષદાય । વ્યાપિવૈકુણ્ઠદાત્રે । શ્રીમદ્ભાગવતાગમાય ।
શુકવાગમૃતાબ્ધીન્દવે નમઃ । ૨૦

શૌનકાદ્યખિલેષ્ટદાય નમઃ । ભક્તિપ્રવર્તકાય । ત્રાત્રે ।
વ્યાસચિન્તાવિનાશકાય । સર્વસિદ્ધાન્તવાગાત્મને । નારદાદ્યખિલેષ્ટદાય ।
અન્તરાત્મને । ધ્યાનગમ્યાય । ભક્તિરત્નપ્રદાયકાય । મુક્તોપસૃપ્તાય ।
પૂર્ણાત્મને । મુક્તાનાં રતિવર્ધનાય । ભક્તકાર્યૈકનિરતાય ।
દ્રૌણ્યસ્ત્રવિનિવારકાય । ભક્તસ્મયપ્રણેત્રે । ભક્તવાક્પરિપાલકાય ।
બ્રહ્મણ્યદેવાય । ધર્માત્મને । ભક્તાનાં પરીક્ષકાય । આસન્નિહિતકર્ત્રે
નમઃ । ૪૦

માયાહિતકરાય નમઃ । પ્રભવે । ઉત્તરાપ્રાણદાત્રે ।
બ્રહ્માસ્ત્રવિનિવારકાય । સર્વતઃ પાણ્ડવપતયે ।
પરીક્ષિચ્છુદ્ધિકારણાય । સર્વવેદેષુ ગૂઢાત્મને ।
ભક્તૈકહૃદયઙ્ગમાય । કુન્તીસ્તુત્યાય । પ્રસન્નાત્મને ।
પરમાદ્ભુતકાર્યકૃતે । ભીષ્મમુક્તિપ્રદાય । સ્વામિને । ભક્તમોહ
નિવારકાય । સર્વાવસ્થાસુ સંસેવ્યાય । સમાય । સુખહિતપ્રદાય ।
કૃતકૃત્યાય । સર્વસાક્ષિણે । ભક્તસ્ત્રીરતિવર્ધનાય નમઃ । ૬૦

સર્વસૌભાગ્યનિલયાય નમઃ । પરમાશ્ચર્યરૂપધૃશે ।
અનન્યપુરુષસ્વામિને । દ્વારકાભાગ્યભાજનાય ।

બીજસંસ્કારકર્ત્રે । પરીક્ષિજ્જ્ઞાનપોષકાય । સર્વત્ર
પૂર્ણગુણકાય । સર્વભૂષણભૂષિતાય । સર્વલક્ષણદાત્રે ।
ધૃતરાષ્ટ્રવિમુક્તિદાય । નિત્યં સન્માર્ગરક્ષકાય ।
વિદુરપ્રીતિપૂરકાય । લીલાવ્યામોહકર્ત્રે । કાલધર્મપ્રવર્તકાય ।
પાણ્ડવાનાં મોક્ષદાત્રે । પરીક્ષિદ્ભાગ્યવર્ધનાય । કલિનિગ્રહકર્ત્રે ।
ધર્માદીનાં પોષકાય । સત્સઙ્ગજ્ઞાનહેતવે । શ્રીભાગવતકારણાય
નમઃ । ૮૦

દ્વિતીય સ્કન્ધતઃ -

ૐ પ્રાકૃતાદૃષ્ટમાર્ગાય નમઃ । સકલાગમૈઃ શ્રોતવ્યાય ।
શુદ્ધભાવૈઃ કીર્તિતવ્યાય । આત્મવિત્તમૈઃ સ્મર્તવ્યાય ।
અનેકમાર્ગકર્ત્રે । નાનાવિધગતિપ્રદાય । પુરુષાય । સકલાધારાય ।
સત્વૈકનિલયાત્મભુવે । સર્વધ્યેયાય । યોગગમ્યાય । ભક્ત્યા ગ્રાહ્યાય ।
સુરપ્રિયાય । જન્માદિસાર્થકકૃતયે । લીલાકર્ત્રે । સતાં પતયે ।
આદિકર્ત્રે । તત્ત્વકર્ત્રે । સર્વકર્ત્રે । વિશારદાય નમઃ । ૧૦૦

ૐ નાનાવતારકર્ત્રે નમઃ । બ્રહ્માવિર્ભાવકારણાય । દશલીલાવિનોદિને ।
નાનાસૃષ્ટિપ્રવર્તકાય । અનેકકલ્પકર્ત્રે । સર્વદોષવિવર્જિતાય ॥

તૃતીયસ્કન્ધતઃ -

ૐ વૈરાગ્યહેતવે । તીર્થાત્મને । સર્વતીર્થફલપ્રદાય ।
તીર્થશુદ્ધૈકનિલયાય । સ્વમાર્ગપરિપોષકાય । તીર્થકીર્તયે ।
ભક્તગમ્યાય । ભક્તાનુશયકાર્યકૃતે । ભક્તતુલ્યાય ।
સર્વતુલ્યાય । સ્વેચ્છાસર્વપ્રવર્તકાય । ગુણાતીતાય । અનવદ્યાત્મને ।
સર્ગલીલાપ્રવર્તકાય નમઃ । ૧૨૦

ૐ સાક્ષાત્સર્વજગત્કર્ત્રે નમઃ । મહદાદિપ્રવર્તકાય । માયાપ્રવર્તકાય ।
સાક્ષિણે । માયારતિવિવર્ધનાય । આકાશાત્મને । ચતુર્મૂર્તયે । ચતુર્ધા
ભૂતભાવનાય । રજઃપ્રવર્તકાય । બ્રહ્મણે । મરીચ્યાદિપિતામહાય ।
વેદકર્ત્રે । યજ્ઞકર્ત્રે । સર્વકર્ત્રે । અમિતાત્મકાય ।
અનેકસૃષ્ટિકર્ત્રે । દશધાસૃષ્ટિકારકાય । યજ્ઞાઙ્ગાય ।
યજ્ઞવારાહાય । ભૂધરાય નમઃ । ૧૪૦

ૐ ભૂમિપાલકાય નમઃ । સેતવે । વિધરણાય । જૈત્રાય ।
હિરણ્યાક્ષાન્તકાય । સુરાય । દિતિકશ્યપકામૈકહેતુસૃષ્ટિપ્રવર્તકાય ।

દેવાભયપ્રદાત્રે । વૈકુણ્ઠાધિપતયે । મહતે । સર્વગર્વપ્રહારિણે ।
સનકાદ્યખિલાર્થદાય । સર્વાશ્વાસનકર્ત્રે । ભક્તતુલ્યાહવપ્રદાય ।
કાલલક્ષણહેતવે । સર્વાર્થજ્ઞાપકાય । પરાય । ભક્તોન્નતિકરાય ।
સર્વપ્રકારસુખદાયકાય । નાનાયુદ્ધપ્રહરણાય નમઃ । ૧૬૦

ૐ બ્રહ્મશાપવિમોચકાય નમઃ । પુષ્ટિસર્ગપ્રણેત્રે ।
ગુણસૃષ્ટિપ્રવર્તકાય । કર્દમેષ્ટપ્રદાત્રે । દેવહૂત્યખિલાર્થદાય ।
શુક્લનારાયણાય । સત્યકાલધર્મપ્રવર્તકાય । જ્ઞાનાવતારાય ।
શાન્તાત્મને । કપિલાય । કાલનાશકાય । ત્રિગુણાધિપતયે ।
સાઙ્ખ્યશાસ્ત્રકર્ત્રે । વિશારદાય । સર્ગદૂષણહારિણે ।
પુષ્ટિમોક્ષપ્રવર્તકાય । લૌકિકાનન્દદાત્રે । બ્રહ્માનન્દપ્રવર્તકાય ।
ભક્તિસિદ્ધાન્તવક્ત્રે । સગુણજ્ઞાનદીપકાય નમઃ । ૧૮૦

ૐ આત્મપ્રદાય નમઃ । પૂર્ણકામાય । યોગાત્મને । યોગભાવિતાય ।
જીવન્મુક્તિપ્રદાય । શ્રીમતે । અનન્યભક્તિપ્રવર્તકાય ।
કાલસામર્થ્યદાત્રે । કાલદોષનિવારકાય । ગર્ભોત્તમજ્ઞાનદાત્રે ।
કર્મમાર્ગનિયામકાય । સર્વમાર્ગનિરાકર્ત્રે । ભક્તિમાર્ગૈકપોષકાય ।
સિદ્ધિહેતવે । સર્વહેતવે । સર્વાશ્ચર્યૈકકારણાય ।
ચેતનાચેતનપતયે । સમુદ્રપરિપૂજિતાય । સાઙ્ખ્યાચાર્યસ્તુતાય ।
સિદ્ધપૂજિતાય નમઃ । ૨૦૦॥ સર્વપૂજિતાય નમઃ । ૨૦૧

ચતુર્થસ્કન્ધતઃ -

ૐ વિસર્ગકર્ત્રે । સર્વેશાય । કોટિસૂર્યસમપ્રભાય । અનન્તગુણગમ્ભીરાય ।
મહાપુરુષપૂજિતાય । અનન્તસુખદાત્રે । બ્રહ્મકોટિપ્રજાપતયે ।
સુધાકોટિસ્વાસ્થ્યહેતવે । કામધુક્કોટિકામદાય । સમુદ્રકોટિગમ્ભીરાય ।
તીર્થકોટિસમાહ્વયાય । સુમેરુકોટિનિષ્કમ્પાય । કોટિબ્રહ્માણ્ડવિગ્રહાય ।
કોટ્યશ્વમેધપાપઘ્નાય । વાયુકોટિમહાબલાય । કોટીન્દુજગદાનન્દિને ।
શિવકોટિપ્રસાદકૃતે । સર્વસદ્ગુણમાહાત્મ્યાય । સર્વસદ્ગુણભાજનાય
નમઃ । ૨૨૦

ૐ મન્વાદિપ્રેરકાય નમઃ । ધર્માય । યજ્ઞનારાયણાય । પરાય ।
આકૃતિસૂનવે । દેવેન્દ્રાય । રુચિજન્મને । અભયપ્રદાય । દક્ષિણાપતયે ।
ઓજસ્વિને । ક્રિયાશક્તયે । પરાયણાય । દત્તાત્રેયાય । યોગપતયે ।
યોગમાર્ગપ્રવર્તકાય । અનસૂયાગર્ભરત્નાય । ઋષિવંશવિવર્ધનાય ।

ગુણત્રયવિભાગજ્ઞાય । ચતુર્વર્ગવિશારદાય । નારાયણાય નમઃ । ૨૪૦

ૐ ધર્મસૂનવે નમઃ । મૂર્તિપુણ્યયશસ્કરાય । સહસ્રકવચચ્છેદિને ।
તપઃસારાય । નરપ્રિયાય । વિશ્વાનન્દપ્રદાય । કર્મસાક્ષિણે ।
ભારતપૂજિતાય । અનન્તાદ્ભુતમાહાત્મ્યાય । બદરીસ્થાનભૂષણાય ।
જિતકામાય । જિતક્રોધાય । જિતસઙ્ગાય । જિતેન્દ્રિયાય ।
ઉર્વશીપ્રભવાય । સ્વર્ગસુખદાયિને । સ્થિતિપ્રદાય । અમાનિને ।
માનદાય । ગોપ્ત્રે નમઃ । ૨૬૦

ૐ ભગવચ્છાસ્ત્રબોધકાય નમઃ । બ્રહ્માદિવન્દ્યાય । હંસાય । શ્રિયૈ ।
માયાવૈભવકારણાય । વિવિધાનન્દસર્ગાત્મને । વિશ્વપૂરણતત્પરાય ।
યજ્ઞજીવનહેતવે । યજ્ઞસ્વામિને । ઇષ્ટબોધકાય । નાનાસિદ્ધાન્તગમ્યાય ।
સપ્તતન્તવે । ષડ્ગુણાય । પ્રતિસર્ગજગત્કર્ત્રે । નાનાલીલાવિશારદાય ।
ધ્રુવપ્રિયાય । ધ્રુવસ્વામિને । ચિન્તિતાધિકદાયકાય ।
દુર્લભાનન્તફલદાય । દયાનિધયે નમઃ । ૨૮૦

ૐ અમિત્રઘ્ને નમઃ । અઙ્ગસ્વામિને । કૃપાસારાય । વૈન્યાય ।
ભૂમિનિયામકાય । ભૂવિદોગ્ધ્રે । પ્રજાપ્રાણપાલનૈકપરાયણાય ।
યશોદાત્રે । જ્ઞાનદાત્રે । સર્વધર્મપ્રદર્શકાય । પુરઞ્જનાય ।
જગન્મિત્રાય । વિસર્ગાન્તપ્રદર્શનાય । પ્રચેતસાં પતયે ।
ચિત્રભક્તિહેતવે । જનાર્દનાય । સ્મૃતિહેતુબ્રહ્મભાવસાયુજ્યાદિપ્રદાય ।
શુભાય ॥

પઞ્ચમસ્કન્ધતઃ -

ૐ વિજયિને । સ્થિતિલીલાબ્ધયે નમઃ । ૩૦૦

ૐ અચ્યુતાય નમઃ । વિજયપ્રદાય । સ્વસામર્થ્યપ્રદાય ।
ભક્તકીર્તિહેતવે । અધોક્ષજાય । પ્રિયવ્રતપ્રિયસ્વામિને ।
સ્વેચ્છાવાદવિશારદાય । સઙ્ખ્યગમ્યાય । સ્વપ્રકાશાય ।
સર્વસઙ્ગવિવર્જિતાય । ઇચ્છાયાં સમર્યાદાય । ત્યાગમાત્રોપલમ્ભનાય ।
અચિન્ત્યકાર્યકર્ત્રે । તર્કાગોચરકાર્યકૃતે । શ‍ૃઙ્ગારરસમર્યાદાયૈ ।
આગ્નીધ્રરસભાજનાય । નાભીષ્ટપૂરકાય । કર્મમર્યાદાદર્શનોત્સુકાય ।
સર્વરૂપાય । અદ્ભુતતમાય નમઃ । ૩૨૦

ૐ મર્યાદાપુરુષોત્તમાય નમઃ । સર્વરૂપેષુ સત્યાત્મને । કાલસાક્ષિણે ।
શશિપ્રભાય । મેરુદેવીવ્રતફલાય । ઋષભાય । ભગલક્ષણાય ।

જગત્સન્તર્પકાય । મેઘરૂપિણે । દેવેન્દ્રદર્પઘ્ને । જયન્તીપતયે ।
અત્યન્તપ્રમાણાશેષલૌકિકાય । શતધાન્યસ્થભૂતાત્મને । શતાનન્દાય ।
ગુણપ્રસુવે । વૈષ્ણવોત્પાદનપરાય । સર્વધર્મોપદેશકાય ।
પરહંસક્રિયાગોપ્ત્રે । યોગચર્યાપ્રવર્તકાય । ચતુર્થાશ્રમનિર્ણેત્રે
નમઃ । ૩૪૦

ૐ સદાનન્દશરીરવતે નમઃ । પ્રદર્શિતાન્યધર્માય । ભરતસ્વામિને ।
અપારકૃતે । યથાવત્કર્મકર્ત્રે । સઙ્ગાનિષ્ટપ્રદર્શકાય ।
આવશ્યકપુનર્જન્મકર્મમાર્ગપ્રદર્શકાય । યજ્ઞરૂપમૃગાય ।
શાન્તાય । સહિષ્ણવે । સત્પરાક્રમાય । રહૂગણગતિજ્ઞાય ।
રહૂગણવિમોચકાય । ભવાટવીતત્ત્વવક્ત્રે । બહિર્મુખહિતે રતાય ।
ગયસ્વામિને । સ્થાનવંશકર્ત્રે । સ્થાનવિભાગકૃતે । પુરુષાવયવાય ।
ભૂમિવિશેષવિનિરૂપકાય નમઃ । ૩૬૦

ૐ જમ્બૂદ્વીપપતયે નમઃ । મેરુનાભિપદ્મરુહાશ્રયાય ।
નાનાવિભૂતિલીલાઢ્યાય । ગઙ્ગોત્પત્તિનિદાનકૃતે । ગઙ્ગામાહાત્મ્યહેતવે ।
ગઙ્ગારૂપાય । અતિગૂઢકૃતે । વૈકુણ્ઠદેહહેત્વમ્બુજન્મકૃતે ।
સર્વપાવનાય । શિવસ્વામિને । શિવોપાસ્યાય । ગૂઢાય ।
સઙ્કર્ષણાત્મકાય । સ્થાનરક્ષાર્થમત્સ્યાદિરૂપાય । સર્વૈકપૂજિતાય ।
ઉપાસ્યનાનારૂપાત્મને । જ્યોતીરૂપાય । ગતિપ્રદાય । સૂર્યનારાયણાય ।
વેદકાન્તયે નમઃ । ૩૮૦

ૐ ઉજ્જ્વલવેષધૃશે નમઃ । હંસાય । અન્તરિક્ષગમનાય ।
સર્વપ્રસવકારણાય । આનન્દકર્ત્રે । વસુદાય । બુધાય ।
વાક્પતયે । ઉજ્જ્વલાય । કાલાત્મને । કાલકાલાય । કાલચ્છેદકૃતે ।
ઉત્તમાય । શિશુમારાય । સર્વમૂર્તયે । આધિદૈવિકરૂપધૃશે ।
અનન્તસુખભોગાઢ્યાય । વિવરૈશ્વર્યભાજનાય । સઙ્કર્ષણાય ।
દૈત્યપતયે નમઃ । ૪૦૦

ૐ સર્વાધારાય નમઃ । બૃહદ્વપુષે । અનન્તનરકચ્છેદિને ।
સ્મૃતિમાત્રાર્તિનાશનાય । સર્વાનુગ્રહકર્ત્રે । મર્યાદાભિન્નશાસ્ત્રકૃતે ॥

ષષ્ઠસ્કન્ધતઃ -

ૐ કાલાન્તકભયચ્છેદિને । નામસામર્થ્યરૂપધૃશે ।
ઉદ્ધારાનર્હગોપ્ત્રાત્મને । નામાદિપ્રેરકોત્તમાય ।

અજામિલમહાદુષ્ટમોચકાય । અઘવિમોચકાય । ધર્મવક્ત્રે ।
અક્લિષ્ટવક્ત્રે । વિષ્ણુધર્મસ્વરૂપધૃશે । સન્માર્ગપ્રેરકાય ।
ધર્ત્રે । ત્યાગહેતવે । અધોક્ષજાય । વૈકુણ્ઠપુરનેત્રે નમઃ । ૪૨૦

ૐ દાસસંવૃદ્ધિકારકાય નમઃ । દક્ષપ્રસાદકૃતે ।
હંસગુહ્યસ્તુતિવિભાવનાય । સ્વાભિપ્રાયપ્રવક્ત્રે । મુક્તજીવપ્રસૂતિકૃતે ।
નારદપ્રેરણાત્મને । હર્યશ્વબ્રહ્મભાવનાય । શબલાશ્વહિતાય ।
ગૂઢવાક્યાર્થજ્ઞાપનક્ષમાય । ગૂઢાર્થજ્ઞાપનાય ।
સર્વમોક્ષાનન્દપ્રતિષ્ઠિતાય । પુષ્ટિપ્રરોહહેતવે ।
દાસૈકજ્ઞાતહૃદ્ગતાય । શાન્તિકર્ત્રે । સુહિતકૃતે । સ્ત્રીપ્રસુવે ।
સર્વકામદુહે । પુષ્ટિવંશપ્રણેત્રે । વિશ્વરૂપેષ્ટદેવતાયૈ ।
કવચાત્મને નમઃ । ૪૪૦

ૐ પાલનાત્મને નમઃ । વર્મોપચિતિકારણાય । વિશ્વરૂપશિરશ્છેદિને ।
ત્વાષ્ટ્રયજ્ઞવિનાશકાય । વૃત્રસ્વામિને । વૃત્રગમ્યાય ।
વૃત્રવ્રતપરાયણાય । વૃત્રકીર્તયે । વૃત્રમોક્ષાય ।
મઘવત્પ્રાણરક્ષકાય । અશ્વમેધહવિર્ભોક્ત્રે । દેવેન્દ્રામીવનાશકાય ।
સંસારમોચકાય । ચિત્રકેતુબોધનતત્પરાય । મન્ત્રસિદ્ધયે ।
સિદ્ધિહેતવે । સુસિદ્ધિફલદાયકાય । મહાદેવતિરસ્કર્ત્રે । ભક્ત્યૈ
પૂર્વાર્થનાશકાય । દેવબ્રાહ્મણવિદ્વેષવૈમુખ્યજ્ઞાપકાય નમઃ । ૪૬૦

ૐ શિવાય નમઃ । આદિત્યાય । દૈત્યરાજાય । મહત્પતયે । અચિન્ત્યકૃતે ।
મરુતાં ભેદકાય । ત્રાત્રે । વ્રતાત્મને । પુમ્પ્રસૂતિકૃતે ॥

સપ્તમસ્કન્ધતઃ -

ૐ કર્માત્મને । વાસનાત્મને । ઊતિલીલાપરાયણાય ।
સમદૈત્યસુરાય । સ્વાત્મને । વૈષમ્યજ્ઞાનસંશ્રયાય ।
દેહાદ્યુપાધિરહિતાય । સર્વજ્ઞાય । સર્વહેતુવિદે ।
બ્રહ્મવાક્સ્થાપનપરાય । સ્વજન્માવધિકાર્યકૃતે નમઃ । ૪૮૦

ૐ સદસદ્વાસનાહેતવે નમઃ । ત્રિસત્યાય । ભક્તમોચકાય ।
હિરણ્યકશિપુદ્વેષિણે । પ્રવિષ્ટાત્મને । અતિભીષણાય ।
શાન્તિજ્ઞાનાદિહેતવે । પ્રહ્લાદોત્પત્તિકારણાય । દૈત્યસિદ્ધાન્તસદ્વક્ત્રે ।
તપઃસારાય । ઉદારધિયે । દૈત્યહેતુપ્રકટનાય ।
ભક્તિચિહ્નપ્રકાશકાય । સદ્વેષહેતવે । સદ્વેષવાસનાત્મને ।

નિરન્તરાય । નૈષ્ઠુર્યસીમ્ને । પ્રહ્લાદવત્સલાય । સઙ્ગદોષઘ્ને ।
મહાનુભાવાય નમઃ । ૫૦૦

ૐ સાકારાય નમઃ । સર્વાકારાય । પ્રમાણભુવે ।
સ્તમ્ભપ્રસૂતયે । નૃહરયે । નૃસિંહાય । ભીમવિક્રમાય ।
વિકટાસ્યાય । લલજ્જિહ્વાય । નખશસ્ત્રાય । જવોત્કટાય ।
હિરણ્યકશિપુચ્છેદિને । ક્રૂરદૈત્યનિવારકાય । સિંહાસનસ્થાય ।
ક્રોધાત્મને । લક્ષ્મીભયવિવર્ધનાય । બ્રહ્માદ્યત્યન્તભયભુવે ।
અપૂર્વાચિન્ત્યરૂપધૃશે । ભક્તૈકશાન્તહૃદયાય । ભક્તસ્તુત્યાય
નમઃ । ૫૨૦

ૐ સ્તુતિપ્રિયાય નમઃ । ભક્તાઙ્ગલેહનોદ્ધૂતક્રોધપુઞ્જાય ।
પ્રશાન્તધિયે । સ્મૃતિમાત્રભયત્રાત્રે । બ્રહ્મબુદ્ધિપ્રદાયકાય ।
ગોરૂપધારિણે । અમૃતપાય । શિવકીર્તિવિવર્ધનાય ।
ધર્માત્મને । સર્વકર્માત્મને । વિશેષાત્મને । આશ્રમપ્રભવે ।
સંસારમગ્નસ્યોદ્ધર્ત્રે । સન્માર્ગાખિલતત્ત્વવાચે ।

અષ્ટમસ્કન્ધતઃ -

ૐ આચારાત્મને । સદાચારાય । મન્વન્તરવિભાવનાય ।
સ્મૃત્યાશેષાશુભહરાય । ગજેન્દ્રસ્મૃતિકારણાય ।
જાતિસ્મરણહેત્વેકપૂજાભક્તિસ્વરૂપદાય નમઃ । ૫૪૦

ૐ યજ્ઞાય નમઃ । ભયાન્મનુત્રાત્રે । વિભવે । બ્રહ્મવ્રતાશ્રયાય ।
સત્યસેનાય । દુષ્ટઘાતિને । હરયે । ગજવિમોચકાય । વૈકુણ્ઠાય ।
લોકકર્ત્રે । અજિતાય । અમૃતકારણાય । ઉરુક્રમાય । ભૂમિહર્ત્રે ।
સાર્વભૌમાય । બલિપ્રિયાય । વિભવે । સર્વહિતૈકાત્મને । વિષ્વક્સેનાય ।
શિવપ્રિયાય નમઃ । ૫૬૦

ૐ ધર્મસેતવે નમઃ । લોકધૃતયે । સુધામાન્તરપાલકાય ।
ઉપહર્ત્રે । યોગપતયે । બૃહદ્ભાનવે । ક્રિયાપતયે ।
ચતુર્દશપ્રમાણાત્મને । ધર્માય । મન્વાદિબોધકાય ।
લક્ષ્મીભોગૈકનિલયાય । દેવમન્ત્રપ્રદાયકાય । દૈત્યવ્યામોહકાય ।
સાક્ષાદ્ગરુડસ્કન્ધસંશ્રયાય । લીલામન્દરધારિણે ।
દૈત્યવાસુકિપૂજિતાય । સમુદ્રોન્મથનાયત્તાય । અવિઘ્નકર્ત્રે ।
સ્વવાક્યકૃતે । આદિકૂર્માય નમઃ । ૫૮૦

ૐ પવિત્રાત્મને નમઃ । મન્દરાધર્ષણોત્સુકાય ।
શ્વાસૈજદબ્ધિવાર્વીચયે । કલ્પાન્તાવધિકાર્યકૃતે ।
ચતુર્દશમહારત્નાય । લક્ષ્મીસૌભાગ્યવર્ધનાય । ધન્વન્તરયે ।
સુધાહસ્તાય । યજ્ઞભોક્ત્રે । આર્તિનાશનાય । આયુર્વેદપ્રણેત્રે ।
દેવદૈત્યાખિલાર્ચિતાય । બુદ્ધિવ્યામોહકાય । દેવકાર્યસાધનતત્પરાય ।
માયયા સ્ત્રીરૂપાય । વક્ત્રે । દૈત્યાન્તઃકરણપ્રિયાય ।
પાયિતામૃતદેવાંશાય । યુદ્ધહેતુસ્મૃતિપ્રદાય । સુમાલિમાલિવધકૃતે
નમઃ । ૬૦૦

ૐ માલ્યવત્પ્રાણહારકાય નમઃ । કાલનેમિશિરશ્છેદિને ।
દૈત્યયજ્ઞવિનાશકાય । ઇન્દ્રસામર્થ્યદાત્રે ।
દૈત્યશેષસ્થિતિપ્રિયાય । શિવવ્યામોહકાય । માયિને ।
ભૃગુમન્ત્રસ્વશક્તિદાય । બલિજીવનકર્ત્રે । સ્વર્ગહેતવે ।
બ્રહ્માર્ચિતાય । અદિત્યાનન્દકર્ત્રે । કશ્યપાદિતિસમ્ભવાય । ઉપેન્દ્રાય ।
ઇન્દ્રાવરજાય । વામનબ્રહ્મરૂપધૃશે । બ્રહ્માદિસેવિતવપુષે ।
યજ્ઞપાવનતત્પરાય । યાજ્ઞોપદેશકર્ત્રે । જ્ઞાપિતાશેષસંસ્થિતાય
નમઃ । ૬૨૦

ૐ સત્યાર્થપ્રેરકાય નમઃ । સર્વહર્ત્રે । ગર્વવિનાશકાય ।
ત્રિવિક્રમાય । ત્રિલોકાત્મને । વિશ્વમૂર્તયે । પૃથુશ્રવસે ।
પાશબદ્ધબલયે । સર્વદૈત્યપક્ષોપમર્દકાય । સુતલસ્થાપિતબલયે ।
સ્વર્ગાધિકસુખપ્રદાય । કર્મસમ્પૂર્તિકર્ત્રે । સ્વર્ગસંસ્થાપિતામરાય ।
જ્ઞાતત્રિવિધધર્માત્મને । મહામીનાય । અબ્ધિસંશ્રયાય ।
સત્યવ્રતપ્રિયાય । ગોપ્ત્રે । મત્સ્યમૂર્તિધૃતશ્રુતયે ।
શ ૃઙ્ગબદ્ધધૃતક્ષોણયે નમઃ । ૬૪૦॥ ઓં સર્વાર્થજ્ઞાપકાય
નમઃ । ગુરવે ।

નવમસ્કન્ધતઃ -

ૐ ઈશસેવકલીલાત્મને । સૂર્યવંશપ્રવર્તકાય । સોમવંશોદ્ભવકરાય ।
મનુપુત્રગતિપ્રદાય । અમ્બરીષપ્રિયાય । સાધવે ।
દુર્વાસોગર્વનાશકાય । બ્રહ્મશાપોપસંહર્ત્રે । ભક્તકીર્તિવિવર્ધનાય ।
ઇક્ષ્વાકુવંશજનકાય । સગરાદ્યખિલાર્થદાય । ભગીરથમહાયત્નાય ।
ગઙ્ગાધૌતાઙ્ઘ્રિપઙ્કજાય । બ્રહ્મસ્વામિને । શિવસ્વામિને ।
સગરાત્મજમુક્તિદાય । ખટ્વાઙ્ગમોક્ષહેતવે । રઘુવંશવિવર્ધનાય

નમઃ । ૬૬૦

ૐ રઘુનાથાય નમઃ । રામચન્દ્રાય । રામભદ્રાય । રઘુપ્રિયાય ।
અનન્તકીર્તયે । પુણ્યાત્મને । પુણ્યશ્લોકૈકભાસ્કરાય । કોશલેન્દ્રાય ।
પ્રમાણાત્મને । સેવ્યાય । દશરથાત્મજાય । લક્ષ્મણાય । ભરતાય ।
શત્રુઘ્નાય । વ્યૂહવિગ્રહાય । વિશ્વામિત્રપ્રિયાય । દાન્તાય ।
તાડકાવધમોક્ષદાય । વાયવ્યાસ્ત્રાબ્ધિનિક્ષિપ્તમારીચાય । સુબાહુઘ્ને
નમઃ । ૬૮૦

ૐ વૃષધ્વજધનુર્ભઙ્ગપ્રાપ્તસીતામહોત્સવાય ।
સીતાપતયે । ભૃગુપતિગર્વપર્વતનાશકાય ।
અયોધ્યાસ્થમહાભોગયુક્તલક્ષ્મીવિનોદવતે ।
કૈકયીવાક્યકર્ત્રે । પિતૃવાક્પરિપાલકાય । વૈરાગ્યબોધકાય ।
અનન્યસાત્ત્વિકસ્થાનબોધકાય । અહલ્યાદુઃખહારિણે । ગુહસ્વામિને ।
સલક્ષ્મણાય । ચિત્રકૂટપ્રિયસ્થાનાય । દણ્ડકારણ્યપાવનાય ।
શરભઙ્ગસુતીક્ષ્ણાદિપૂજિતાય । અગસ્ત્યભાગ્યભુવે ।
ઋષિસમ્પ્રાર્થિતકૃતયે । વિરાધવધપણ્ડિતાય ।
છિન્નશૂર્પણખાનાસાય । ખરદૂષણઘાતકાય ।
એકબાણહતાનેકસહસ્રબલરાક્ષસાય નમઃ । ૭૦૦

ૐ મારીચઘાતિને નમઃ । નિયતસત્તાસમ્બન્ધશોભિતાય । સીતાવિયોગનાટ્યાય ।
જટાયુવધમોક્ષદાય । શબરીપૂજિતાય । ભક્તહનુમત્પ્રમુખાવૃતાય ।
દુન્દુભ્યસ્થિપ્રહરણાય । સપ્તતાલવિભેદનાય । સુગ્રીવરાજ્યદાય ।
વાલિઘાતિને । સાગરશોષિણે । સેતુબન્ધકર્ત્રે । વિભીષણહિતપ્રદાય ।
રાવણાદિશિરશ્છેદિને । રાક્ષસાઘૌઘનાશકાય । સીતાઽભયપ્રદાત્રે ।
પુષ્પકાગમનોત્સુકાય । અયોધ્યાપતયે । અત્યન્તસર્વલોકસુખપ્રદાય ।
મથુરાપુરનિર્માત્રે નમઃ । ૭૨૦

ૐ સુકૃતજ્ઞસ્વરૂપદાય નમઃ । જનકજ્ઞાનગમ્યાય ।
ઐલાન્તપ્રકટશ્રુતયે । હૈહયાન્તકરાય । રામાય ।
દુષ્ટક્ષત્રવિનાશકાય । સોમવંશહિતૈકાત્મને ।
યદુવંશવિવર્ધનાય ।

દશમસ્કન્ધતઃ -

ૐ પરબ્રહ્માવતરણાય । કેશવાય । ક્લેશનાશનાય । ભૂમિભારાવતરણાય ।

ભક્તાર્થાખિલમાનસાય । સર્વભક્તનિરોધાત્મને ।
લીલાનન્તનિરોધકૃતે । ભૂમિષ્ઠપરમાનન્દાય ।
દેવકીશુદ્ધિકારણાય । વસુદેવજ્ઞાનનિષ્ઠસમજીવનવારકાય ।
સર્વવૈરાગ્યકરણસ્વલીલાધારશોધકાય । માયાજ્ઞાપનકર્ત્રે નમઃ । ૭૪૦

ૐ શેષસમ્ભારસમ્ભૃતયે નમઃ । ભક્તક્લેશપરિજ્ઞાત્રે । તન્નિવારણત
ત્પરાય । આવિષ્ટવસુદેવાંશાય । દેવકીગર્ભભૂષણાય । પૂર્ણતેજોમયાય ।
પૂર્ણાય । કંસાધૃષ્યપ્રતાપવતે । વિવેકજ્ઞાનદાત્રે ।
બ્રહ્માદ્યખિલસંસ્તુતાય । સત્યાય । જગત્કલ્પતરવે । નાનારૂપવિમોહનાય ।
ભક્તિમાર્ગપ્રતિષ્ઠાત્રે । વિદ્વન્મોહપ્રવર્તકાય । મૂલકાલગુણદ્રષ્ટ્રે ।
નયનાનન્દભાજનાય । વસુદેવસુખાબ્ધયે । દેવકીનયનામૃતાય ।
પિતૃમાતૃસ્તુતાય નમઃ । ૭૬૦

ૐ પૂર્વસર્વવૃત્તાન્તબોધકાય નમઃ ।
ગોકુલાગતિલીલાપ્તવસુદેવકરસ્થિતયે । સર્વેશત્વપ્રકટનાય ।
માયાવ્યત્યયકારકાય । જ્ઞાનમોહિતદુષ્ટેશાય । પ્રપઞ્ચાસ્મૃતિકારણાય ।
યશોદાનન્દનાય । નન્દભાગ્યભૂગોકુલોત્સવાય । નન્દપ્રિયાય ।
નન્દસૂનવે । યશોદાયાઃ સ્તનન્ધયાય । પૂતનાસુપયઃપાત્રે ।
મુગ્ધભાવાતિસુન્દરાય । સુન્દરીહૃદયાનન્દાય । ગોપીમન્ત્રાભિમન્ત્રિતાય ।
ગોપાલાશ્ચર્યરસકૃતે । શકટાસુરખણ્ડનાય । નન્દવ્રજજનાનન્દિને ।
નન્દભાગ્યમહોદયાય । તૃણાવર્તવધોત્સાહાય નમઃ । ૭૮૦

ૐ યશોદાજ્ઞાનવિગ્રહાય નમઃ । બલભદ્રપ્રિયાય । કૃષ્ણાય ।
સઙ્કર્ષણસહાયવતે । રામાનુજાય । વાસુદેવાય ।
ગોષ્ઠાઙ્ગણગતિપ્રિયાય । કિઙ્કિણીરવભાવજ્ઞાય ।
વત્સપુચ્છાવલમ્બનાય । નવનીતપ્રિયાય । ગોપીમોહસંસારનાશકાય ।
ગોપબાલકભાવજ્ઞાય । ચૌર્યવિદ્યાવિશારદાય ।
મૃત્સ્નાભક્ષણલીલાસ્યમાહાત્મ્યજ્ઞાનદાયકાય । ધરાદ્રોણપ્રીતિકર્ત્રે ।
દધિભાણ્ડવિભેદનાય । દામોદરાય । ભક્તવશ્યાય ।
યમલાર્જુનભઞ્જનાય । બૃહદ્વનમહાશ્ચર્યાય નમઃ । ૮૦૦

ૐ વૃન્દાવનગતિપ્રિયાય નમઃ । વત્સઘાતિને । બાલકેલયે ।
બકાસુરનિષૂદનાય । અરણ્યભોક્ત્રે । બાલલીલાપરાયણાય ।
પ્રોત્સાહજનકાય । અઘાસુરનિષૂદનાય । વ્યાલમોક્ષપ્રદાય ।

પુષ્ટાય । બ્રહ્મમોહપ્રવર્ધનાય । અનન્તમૂર્તયે । સર્વાત્મને ।
જઙ્ગમસ્થાવરાકૃતયે । બ્રહ્મમોહનકર્ત્રે । સ્તુત્યાય । આત્મને ।
સદાપ્રિયાય । પૌગણ્ડલીલાભિરતયે । ગોચારણપરાયણાય નમઃ । ૮૨૦

ૐ વૃન્દાવનલતાગુલ્મવૃક્ષરૂપનિરૂપકાય નમઃ । નાદબ્રહ્મપ્રકટનાય ।
વયઃપ્રતિકૃતિનિઃસ્વનાય । બર્હિનૃત્યાનુકરણાય ।
ગોપાલાનુકૃતિસ્વનાય । સદાચારપ્રતિષ્ઠાત્રે । બલશ્રમનિરાકૃતયે ।
તરુમૂલકૃતાશેષતલ્પશાયિને । સખિસ્તુતાય । ગોપાલસેવિતપદાય ।
શ્રીલાલિતપદામ્બુજાય । ગોપસમ્પ્રાર્થિતફલદાનનાશિતધેનુકાય ।
કાલીયફણિમાણિક્યરઞ્જિતશ્રીપદામ્બુજાય ।
દૃષ્ટિસઞ્જીવિતાશેષગોપગોગોપિકાપ્રિયાય । લીલાસમ્પીતદાવાગ્નયે ।
પ્રલમ્બવધપણ્ડિતાય । દાવાગ્ન્યાવૃતગોપાલદૃષ્ટ્યાઽઽચ્છાદનવહ્નિપાય ।
વર્ષાશરદ્વિભૂતિશ્રિયે । ગોપીકામપ્રબોધકાય ।
ગોપીરત્નસ્તુતાશેષવેણુવાદ્યવિશારદાય નમઃ । ૮૪૦

ૐ કાત્યાયનીવ્રતવ્યાજસર્વભાવાશ્રિતાઙ્ગનાય નમઃ ।
સત્સઙ્ગતિસ્તુતિવ્યાજસ્તુતવૃન્દાવનાઙ્ઘ્રિપાય ।
ગોપક્ષુચ્છાન્તિ સંવ્યાજ વિપ્રભાર્યાપ્રસાદકૃતે ।
હેતુપ્રાપ્તેન્દ્રયાગસ્વકાર્યગોસવબોધકાય નમઃ ।
શૈલરૂપકૃતાશેષરસભોગસુખાવહાય ।
લીલાગોવર્ધનોદ્ધારપાલિતસ્વવ્રજપ્રિયાય ।
ગોપસ્વચ્છન્દલીલાર્થગર્ગવાક્યાર્થબોધકાય ।
ઇન્દ્રધેનુસ્તુતિપ્રાપ્તગોવિન્દેન્દ્રાભિધાનવતે ।
વ્રતાદિધર્મસંસક્તનન્દક્લેશવિનાશકાય ।
નન્દાદિગોપમાત્રેષ્ટવૈકુણ્ઠગતિદાયકાય ।
વેણુવાદસ્મરક્ષોભમત્તગોપીવિમુક્તિદાય ।
સર્વભાવપ્રાપ્તગોપીસુખસંવર્ધનક્ષમાય ।
ગોપીગર્વપ્રણાશાર્થતિરોધાનસુખપ્રદાય । કૃષ્ણભાવવ્યાપ્તવિશ્વગોપી
ભાવિતવેશધૃશે । રાધાવિશેષસમ્ભોગપ્રાપ્તદોષનિવારકાય ।
પરમપ્રીતિસઙ્ગીતસર્વાદ્ભુતમહાગુણાય ।
માનાપનોદનાક્રન્દગોપીદૃષ્ટિમહોત્સવાય । ગોપિકાવ્યાપ્તસર્વાઙ્ગાય ।
સ્ત્રીસમ્ભાષવિશારદાય । રાસોત્સવમહાસૌખ્યગોપીસમ્ભોગસાગરાય
નમઃ । ૮૬૦

ॐ જલસ્થલરતિવ્યાપ્તગોપીદૃષ્ટ્યભિપૂજિતાય નમઃ ।
શાસ્ત્રાનપેક્ષકામૈકમુક્તિદ્વારવિવર્ધનાય ।
સુદર્શનમહાસર્પગ્રસ્તનન્દવિમોચકાય ।
ગીતમોહિતગોપીધૃક્શઙ્ખચૂડવિનાશકાય । ગુણસઙ્ગીતસન્તુષ્ટયે ।
ગોપીસંસારવિસ્મૃતયે । અરિષ્ટમથનાય । દૈત્યબુદ્ધિવ્યામોહકારકાય ।
કેશિઘાતિને । નારદેષ્ટાય । વ્યોમાસુરવિનાશકાય ।
અક્રૂરભક્તિસંરાદ્ધપાદરેણુમહાનિધયે । રથાવરોહશુદ્ધાત્મને ।
ગોપીમાનસહારકાય । હ્રદસન્દર્શિતાશેષવૈકુણ્ઠાક્રૂરસંસ્તુતાય ।
મથુરાગમનોત્સાહાય । મથુરાભાગ્યભાજનાય ।
મથુરાનગરીશોભાદર્શનોત્સુકમાનસાય । દુષ્ટરજ્જકઘાતિને ।
વાયકાર્ચિતવિગ્રહાય નમઃ । ૮૮૦

ॐ વસ્ત્રમાલાસુશોભાઙ્ગાય નમઃ । કુબ્જાલેપનભૂષિતાય ।
કુબ્જાસુરૂપકર્ત્રે । કુબ્જારતિવરપ્રદાય ।
પ્રસાદરૂપસન્તુષ્ટહરકોદણ્ડખણ્ડનાય ।
શકલાહતકંસાપ્તધનૂરક્ષકસૈનિકાય ।
જાગ્રત્સ્વપ્નભયવ્યાપ્તમૃત્યુલક્ષણબોધકાય । મથુરામલ્લાય ।
ઓજસ્વિને । મલ્લયુદ્ધવિશારદાય । સદ્યઃ કુવલયાપીડઘાતિને ।
ચાણૂરમર્દનાય । લીલાહતમહામલ્લાય । શલતોશલઘાતકાય ।
કંસાન્તકાય । જિતામિત્રાય । વસુદેવવિમોચકાય ।
જ્ઞાતતત્ત્વપિતૃજ્ઞાનમોહનામૃતવાઙ્મયાય ।
ઉગ્રસેન પ્રતિષ્ઠાત્રે । યાદવાધિવિનાશકાય નમઃ । ૯૦૦
ઓં નન્દાદિસાન્ત્વનકરાય નમઃ । બ્રહ્મચર્યવ્રતે સ્થિતાય ।
ગુરુશુશ્રૂષણપરાય । વિદ્યાપારમિતેશ્વરાય । સાન્દીપનિમૃતાપત્યદાત્રે ।
કાલાન્તકાદિજિતે । ગોકુલાશ્વાસનપરાય । યશોદાનન્દપોષકાય ।
ગોપિકાવિરહવ્યાજમનોગતિરતિપ્રદાય । સમોદ્ભવભ્રમરવાચે ।
ગોપિકામોહનાશકાય । કુબ્જારતિપ્રદાય । અક્રૂરપવિત્રીકૃતભૂગૃહાય ।
પૃથાદુઃખપ્રણેત્રે । પાણ્ડવાનાં સુખપ્રદાય ।

ઉત્તરાર્ધતઃ -
ॐ જરાસન્ધસમાનીતસૈન્યઘાતિને । વિચારકાય ।
યવનવ્યાપ્તમથુરાજનદત્તકુશસ્થલિને ।
દ્વારકાદ્ભુતનિર્માણવિસ્માપિતસુરાસુરાય ।

મનુષ્યમાત્રભોગાર્થભૂમ્યાનીતેન્દ્રવૈભવાય નમઃ । ૯૨૦

ૐ યવનવ્યાપ્તમથુરાનિર્ગમાનન્દવિગ્રહાય
નમઃ । મુચુકુન્દમહાબોધયવનપ્રાણદર્પઘ્ને ।
મુચુકુન્દસ્તુતાશેષગુણકર્મમહોદયાય । ફલપ્રદાનસન્તુષ્ટયે ।
જન્માન્તરિતમોક્ષદાય । શિવબ્રાહ્મણવાક્યાપ્તજયભીતિવિભાવનાય ।
પ્રવર્ષણપ્રાર્થિતાગ્નિદાનપુણ્યમહોત્સવાય । રુક્મિણીરમણાય । કામપિત્રે ।
પ્રદ્યુમ્નભાવનાય । સ્યમન્તકમણિવ્યાજપ્રાપ્તજામ્બવતીપતયે ।
સત્યભામાપ્રાણપતયે । કાલિન્દીરતિવર્ધનાય । મિત્રવિન્દાપતયે ।
સત્યાપતયે । વૃષનિષૂદનાય । ભદ્રાવાઞ્છિતભર્ત્રે ।
લક્ષ્મણાવરણક્ષમાય । ઇન્દ્રાદિપ્રાર્થિતવધનરકાસુરસૂદનાય ।
મુરારયે નમઃ । ૯૪૦

ૐ પીઠહન્ત્રે નમઃ । તામ્રાદિપ્રાણહારકાય । ષોડશસ્ત્રીસહસ્રેશાય ।
છત્રકુણ્ડલદાનકૃતે । પારિજાતાપહરણાય । દેવેન્દ્રમદનાશકાય ।
રુક્મિણીસમસર્વસ્ત્રીસાધ્યભોગરતિપ્રદાય ।
રુક્મિણીપરિહાસોક્તિવાક્તિરોધાનકારકાય ।
પુત્રપૌત્રમહાભાગ્યગૃહધર્મપ્રવર્તકાય ।
શમ્બરાન્તકસત્પુત્રવિવાહહતરુક્મિકાય । ઉષાપહૃતપૌત્રશ્રિયે ।
બાણબાહુનિવારકાય । શીતજ્વરભયવ્યાપ્તજ્વરસંસ્તુતષડ્ગુણાય ।
શઙ્કરપ્રતિયોદ્ધ્રે । દ્વન્દ્વયુદ્ધવિશારદાય । નૃગપાપપ્રભેત્ત્રે ।
બ્રહ્મસ્વગુણદોષદૃશે । વિષ્ણુભક્તિવિરોધૈકબ્રહ્મસ્વવિનિવારકાય ।
બલભદ્રાહિતગુણાય । ગોકુલપ્રીતિદાયકાય નમઃ । ૯૬૦

ૐ ગોપીસ્નેહૈકનિલયાય નમઃ । ગોપીપ્રાણસ્થિતિપ્રદાય ।
વાક્યાતિગામિયમુનાહલાકર્ષણવૈભવાય । પૌણ્ડ્રકત્યાજિતસ્પર્ધાય ।
કાશીરાજવિભેદનાય । કાશીનિદાહકરણાય । શિવભસ્મપ્રદાયકાય ।
દ્વિવિદપ્રાણઘાતિને । કૌરવાખર્વગર્વનુદે ।
લાઙ્ગલાકૃષ્ટનગરીસંવિગ્નાખિલનાગરાય । પ્રપન્નાભયદાય ।
સામ્બપ્રાપ્તસન્માનભાજનાય । નારદાન્વિષ્ટચરણાય ।
ભક્તવિક્ષેપનાશકાય । સદાચારૈકનિલયાય ।
સુધર્માધ્યાસિતાનનાય । જરાસન્ધાવરુદ્ધેન વિજ્ઞાપિતનિજક્લમાય ।
મન્ત્ર્યુદ્ધવાદિવાક્યોક્તપ્રકારૈકપરાયણાય । રાજસૂયાદિમખકૃતે ।
સમ્પ્રાર્થિતસહાયકૃતે નમઃ । ૯૮૦

ૐ ઇન્દ્રપ્રસ્થપ્રયાણાર્થમહત્સમ્ભારસમ્ભૃતયે નમઃ ।
જરાસન્ધવધવ્યાજમોચિતાશેષભૂમિપાય । સન્માર્ગબોધકાય ।
યજ્ઞાક્ષિતિવારણતત્પરાય । શિશુપાલહતિવ્યાજજયશાપવિમોચકાય ।
દુર્યોધનાભિમાનાબ્ધિશોષબાણવૃકોદરાય ।
મહાદેવવરપ્રાપ્તપુરશાલ્વવિનાશકાય ।
દન્તવક્ત્રવધવ્યાજવિજયાઘૌઘનાશકાય । વિદૂરથપ્રાણહર્ત્રે ।
ન્યસ્તશસ્ત્રાસ્ત્રવિગ્રહાય । ઉપધર્મવિલિપ્તાઙ્ગસૂતઘાતિને ।
વરપ્રદાય । બલ્વલપ્રાણહરણપાલિતર્ષિનુતિક્રિયાય ।
સર્વતીર્થાઘનાશાર્થતીર્થયાત્રાવિશારદાય ।
જ્ઞાનક્રિયાવિભેદેષ્ટફલસાધનતત્પરાય । સારથ્યાદિક્રિયાકર્ત્રે ।
ભક્તવશ્યત્વબોધકાય । સુદામરઙ્કભાર્યાર્થભૂમ્યાનીતેન્દ્રવૈભવાય ।
રવિગ્રહનિમિત્તાપ્તકુરુક્ષેત્રૈકપાવનાય ।
નૃપગોપીસમસ્તસ્ત્રીપાવનાર્થાખિલક્રિયાય નમઃ । ૧૦૦૦

ૐ ઋષિમાર્ગપ્રતિષ્ઠાત્રે નમઃ । વસુદેવમખક્રિયાય ।
વસુદેવજ્ઞાનદાત્રે । દેવકીપુત્રદાયકાય । અર્જુનસ્ત્રીપ્રદાત્રે ।
બહુલાશ્વસ્વરૂપદાય । શ્રુતદેવેષ્ટદાત્રે । સર્વશ્રુતિનિરૂપિતાય ।
મહાદેવાદ્યતિશ્રેષ્ઠાય । ભક્તિલક્ષણનિર્ણયાય ।
વૃકગ્રસ્તશિવત્રાત્રે । નાનાવાક્યવિશારદાય ।
નરગર્વવિનાશાર્થ-હૃતબ્રાહ્મણબાલકાય ।
લોકાલોકપરસ્થાનસ્થિતબાલકદાયકાય ।
દ્વારકાસ્થમહાભોગનાનાસ્ત્રીરતિવર્ધનાય ।
મનસ્તિરોધાનકૃતવ્યગ્રસ્ત્રીચિત્તભાવિતાય ॥

એકાદશસ્કન્ધતઃ -

ૐ મુક્તિલીલાવિહરણાય । મૌશલવ્યાજસંહૃતયે ।
શ્રીભાગવતધર્માદિબોધકાય । ભક્તિનીતિકૃતે નમઃ । ૧૦૨૦

ૐ ઉદ્ધવજ્ઞાનદાત્રે નમઃ । પઞ્ચવિંશતિધા ગુરવે ।
આચારભક્તિમુક્ત્યાદિવક્ત્રે । શબ્દોદ્ભવસ્થિતયે । હંસાય ।
ધર્મપ્રવક્ત્રે । સનકાદ્યુપદેશકૃતે । ભક્તિસાધનવક્ત્રે ।
યોગસિદ્ધિપ્રદાયકાય । નાનાવિભૂતિવક્ત્રે । શુદ્ધધર્માવબોધકાય ।
માર્ગત્રયવિભેદાત્મને । નાનાશઙ્કાનિવારકાય । ભિક્ષુગીતાપ્રવક્ત્રે ।

શુદ્ધસાઙ્ખ્યપ્રવર્તકાય । મનોગુણવિશેષાત્મને ।
જ્ઞાપકોક્તપુરૂરવસે । પૂજાવિધિપ્રવક્ત્રે । સર્વસિદ્ધાન્તબોધકાય ।
લઘુસ્વમાર્ગવક્ત્રે નમઃ । ૧૦૪૦

ૐ સ્વસ્થાનગતિબોધકાય નમઃ । યાદવાઙ્ગોપસંહર્ત્રે ।
સર્વાશ્ચર્યગતિક્રિયાય ।

દ્વાદશસ્કન્ધતઃ -

ૐ કાલધર્મવિભેદાર્થવર્ણનાશનતત્પરાય । બુદ્ધાય । ગુપ્તાર્થવક્ત્રે ।
નાનાશાસ્ત્રવિધાયકાય । નષ્ટધર્મમનુષ્યાદિલક્ષણજ્ઞાપનોત્સુકાય ।
આશ્રયૈકગતિજ્ઞાત્રે । કલ્કિને । કલિમલાપહાય ।
શાસ્ત્રવૈરાગ્યસમ્બોધાય । નાનાપ્રલયબોધકાય । વિશેષતઃ
શુકવ્યાજપરીક્ષિજ્જ્ઞાનબોધકાય । શુકેષ્ટગતિરૂપાત્મને ।
પરીક્ષિદ્દેહમોક્ષદાય । શબ્દરૂપાય । નાદરૂપાય । વેદરૂપાય ।
વિભેદનાય નમઃ । ૧૦૬૦

ૐ વ્યાસાય નમઃ । શાખાપ્રવક્ત્રે । પુરાણાર્થપ્રવર્તકાય ।
માર્કણ્ડેયપ્રસન્નાત્મને । વટપત્રપુટેશયાય ।
માયાવ્યાપ્તમહામોહદુઃખશાન્તિપ્રવર્તકાય । મહાદેવસ્વરૂપાય ।
ભક્તિદાત્રે । કૃપાનિધયે । આદિત્યાન્તર્ગતાય । કાલાય । દ્વાદશાત્મને ।
સુપૂજિતાય । શ્રીભાગવતરૂપાય । સર્વાર્થફલદાયકાય નમઃ । ૧૦૭૫

ઇતિ ભાગવતકથાऽનુસારિણી પુરુષોત્તમસહસ્રાધિકનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Purushottamasahasradhikanamavalih*
pdf was typeset on December 4, 2021

Please send corrections to *sanskrit@cheerful.com*